(10) अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्॥ २१॥

प्रस्तुतोऽयं श्लोकः अभिज्ञान शाकुन्तलस्य प्रथमांकात् गृहीतोऽस्ति। प्रस्तुत श्लोके महाकविः कालिदासः शकुन्तलायाः सौन्दर्यस्य तुलना प्राकृतिक उपादानैः सह विदधाति। — राजा अवितथमाह शकुन्तला ~~तथाद्यत्मातः~~ शकुन्तलायां वल्लतासादृश्यं प्रियम्वदया आरोपितं तदव्यभिचारी इत्यर्थः। तथाह्यस्याः :—

अधरः इति। अधरः - अधरोष्ठः, किसलयस्य - पल्लवस्य, इव रागो - लौहित्यं यस्य स तथाभूतः, रागेण किसलय-तुल्य इति भावः, बाहू - भुजौ, कोमलयोः - मृदुलयोः, विटपयोः - स्कन्धोर्ध्वशाखयोः, अनुकारिणौ - तत्सदृशौ, इत्यर्थः, तथा अङ्गेषु - शरीरावयवेषु, कुसुममिव - पुष्पमिव, लोभनीयं - चित्ताकर्षकं, यौवनं - तारुण्यम्, सन्नद्धं - संजातं, स्वात्मना प्रकटीभूतम् इत्यर्थः।

अङ्गेष्विति बहुवचनेन - वदने कान्तिमत्त्वम्, नेत्रयोरनुरागः, कण्ठे कम्बुसाम्यं त्रिरेखावत्त्वं च, कुचयोरौन्नत्यम्, नाभौ निम्नत्वम्, नितम्बे मध्यनिम्नत्वं मांसलत्वञ्च, जघन जङ्घाजानुषु मांसलत्वम्, उर्वौ विशालत्वम् मृदुलत्वं शीतलत्वञ्च, पदयोर्मांसलत्वम् इत्यादि सूच्यते। कुसुमम् इति जात्येकवचनम्। अत्रोपमालंकारः। —

पदोच्चयो नाम नाटकलक्षणम्। तल्लक्षणमुक्तं दर्पणे - "सञ्चयोऽर्थानुरूपो यः पदानां स पदोच्चयः। इति आर्या - जातिः।

अनुवाद: — अधरोष्ठ नवपल्लव के समान लाल हैं, दोनों हाथ दो कोमल शाखाओं की भाँति हैं। और फूल के समान सुन्दर दीखने वाला यौवन इसके सब अङ्गों में व्याप्त है।

Scanned by CamScanner